महादेवः। यथा, महाभारते। १३। १७।४३।
"ध्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ॥")

निधिनाथः, पुं, (निधीनां नाथः।) कुवेरः। इति त्रिकाण्डशेषः ॥ निधीशः। निधीश्वरः। निधिप्रभुः। इत्यादयः ॥

निधुवनं, क्ली, (नितरां धुवनं हस्तपदादिकम्पनं यत्र।) मैथुनम्। इत्यमरः। २। ७। ५७ ॥ (यथा, शिशुपालवधे। ११। १८।
"अनिमिषमविरामारागिणां सर्व्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य।
इदमुदवसितानामस्फुटालोकसम्पत्
नयनमिव सनिद्रं घूर्णते दैपमर्च्चिः ॥")
नर्म्म। केलिः। इति शब्दरत्नावली ॥ (नितरां धुवनं कम्पनम्।) कम्पः। इति मेदिनी। ने, १८८ ॥

निध्यानं, क्ली, (नि+ध्यै+ल्युट्।) दर्शनम्। इत्यमरः। ३। २। ३१ ॥

निध्वानः, पुं, (नि+ध्वन शब्दे+घञ्।) शब्दः। इति शब्दरत्नावली ॥

निनदः, पुं, (नि+नद+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) शब्दः। इत्यमरः। १।६।२२ ॥ (यथा, देवीभागवते।३।२३।३७।
"शृण्वन्नु तूर्य्यनिनदान् किल वाद्यमानान् ॥")

निनादः, पुं, (नि+नद+पक्षे घञ्।) शब्दः। इत्यमरः।१।६।२२॥(यथा, रामायणे।२।३४।१६।
"स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि ॥")

निन्दकः, त्रि, (निन्दति तच्छीलः। णिदि कुत्सायाम्+"निदिहिंसेति।" ३। २। १४६। इति वुञ्।) निन्दाकारकः। यथा,—
"न भाराः पर्व्वता भारा न भाराः सप्तसागराः।
निन्दका हि महाभारा भारा विश्वासघातकाः॥"
इति कर्म्मलोचनम् ॥

निन्दतलः, त्रि, (निन्दं निन्दार्हं तलं हस्ततलं यस्य।) निन्दितहस्तः। इति शब्दरत्नावली ॥

निन्दनं, क्ली, (णिदि कुत्सायाम्+भावे ल्युट्।) निन्दा। इति शब्दरत्नावली ॥

निन्दा, स्त्री, (निन्दनमिति। णिदि+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः।) अपवादः। दुष्कृतिः। इति शब्दरत्नावली ॥ निन्दनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ कुत्सा ९ गर्हणम् १०। इत्यमरः॥ गर्हा ११ कुत्सनम् १२ परिवादः १३ जुगुप्सनम् १४ अपक्रोशः १५ भर्त्सनम् १६ अववादः १७। इति शब्दरत्नावली ॥ गर्हणा १८ धिक्क्रिया १९। इति हेमचन्द्रः ॥ (यथा, मनुः। २। २००।
"गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥")
हरकेशवभक्तादिनिन्दायां दोषो यथा,—
"हरकेशवयोर्भक्तं ये च निन्दन्ति पापिनः।
भूदेवान् ब्राह्मणांश्चैव स्वगुरुं च पतिव्रताः ॥
यतिभिक्षुकब्रह्मचारिवृष्टिवैष्णवान् सुरांस्तथा।
पच्यन्ते कालसूत्रे ते यावच्चन्द्रदिवाकरौ ॥
श्लेष्ममूत्रपुरीषेषु शेरते ते दिवानिशम्।
भक्षिताः कीटनिकरैः शब्दं कुर्व्वन्ति कातराः ॥
ये निन्दन्ति च ब्रह्माणं स्रष्टारं जगतां गुरुम्।
शिवं सुराणां प्रवरं दुर्गां लक्ष्मीं सरस्वतीम् ॥
सीताञ्च तुलसीं गङ्गां वेदांश्च वेदमातरम्।
व्रतं तपस्यां पूजाञ्च मन्त्रं मन्त्रप्रदं गुरुम् ॥
ते पच्यन्तेऽन्धकूपे वै यावदायुर्विधेरहो।
भक्षिताः सर्पसंघैश्च शब्दं कुर्व्वन्ति सन्ततम् ॥
यो निन्दन्ति हृषीकेशं देवसाम्यं विधाय च।
विष्णुभक्तिप्रदञ्चैव पुराणञ्च श्रुतेः परम् ॥
राधां तदङ्गजा गोपीर्ब्राह्मणांश्च सदार्च्चितान्।
ते पच्यन्तेऽवटे देव! विधातुरायुषा समम् ॥
अधोमुखा ऊर्द्ध्वजङ्घा सर्पसंघैश्च वेष्टिताः।
भक्षिता विकृताकारैः कीटैः सर्पैः समाहृतैः ॥
अतीवकातरा भीताः शब्दं कुर्व्वन्ति सन्ततम्।
श्लेष्ममूत्रपुरीषाणि ध्रुवं भक्षन्ति क्षोभिताः ॥
उल्कां ददति वक्त्राणि तन्मुखे यमकिङ्कराः।
त्रिसन्ध्यं तर्जनं कृत्वा कुर्व्वन्ति दण्डताड़नम् ॥
कुर्व्वन्ति मूत्रपानञ्च प्रहारैस्तृषिता भिया।
तदा कल्पान्तरे सृष्टं सृष्टेश्च प्रथमे पुनः ॥
तेषां भवेत् प्रतीकार इत्याह कमलोद्भवः।
परनिन्दा विनाशाय स्वनिन्दा यशसे परम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।४०।४१ अः ॥
"वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा।
द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत् ॥
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत् ॥
यस्तु देवानृषींश्चैव वेदं वा निन्दति द्विजः।
न तस्य निष्कृतिर्दृष्टा शास्त्रेष्विह मुनीश्वराः! ॥
निन्दयेद्वै गुरुं देवं वेदं वा सोपबृंहणम्।
कल्पकोटिशतं साग्रं रौरवे पच्यते नरः ॥
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम्।
कर्णौ पिधाय गन्तव्यं न चैनानवलोकयेत् ॥
वर्ज्जयेद्वै परेषान्तु रहस्यं गर्हणां बुधः।
न निन्देद्योगिनः सिद्धान् व्रतिनो वा यतींस्तथा ॥
देवतायतनं प्राज्ञो देवानामाकृतिन्तथा ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥

निन्दास्तुतिः, स्त्री, (निन्दया स्तुतिः।) व्याजस्तुतिः। यथा,—
"निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः।"
निन्दया स्तुतिर्गम्यत्वे व्याजेन स्तुतिरिति च व्युत्पत्त्या व्याजस्तुतिः। इति साहित्यदर्पणः। अपि च।
"यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ मता।"
उदाहरणम्।
"तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता माभून्मदस्तव ॥"
इति दण्डी ॥
"कथमवनिप! दर्पो यन्निशातासिधारा-
दलनगलितमूर्द्धां विद्विषां स्वीकृता श्रीः।
ननु तव निहतारेरप्यसौ किन्न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः ॥
इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य।" इति काव्यप्रकाशः ॥

निन्दितः, त्रि, (निन्दास्य जातेति। निन्दा+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ६। इति इतच्।) निन्दायुक्तः। तत्पर्य्यायः। धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सितः ४। इति जटाधरः ॥ (यथा, देवीभागवते। ४। ७। ४९।
"मधु पश्यति मूढ़ात्मा प्रपातं नैव पश्यति।
करोति निन्दितं कर्म्म नरकान्न बिभेति च ॥")

निन्दुः, स्त्री, निन्द्यतेऽप्रजस्त्वेनासौ। णिदि कुत्साया-मित्यादौ औणादिक उप्रत्ययः। मृतवत्सा। इति हेमचन्द्रः। ३। १९५ ॥

निपः, पुं क्ली, (नियतं पिबत्यनेनेति। नि+पा+घञर्थे कः।) कलसः। इत्यमरः। २। ९। ३२ ॥ कदम्बवृक्षे, पुं। इति शब्दचन्द्रिका ॥

निपठः, पुं, (निपठनमिति। नि+पठ+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) पाठः। इत्यमरः। ३। २। २९ ॥

निपत्या, स्त्री, (निपतत्यस्यामिति। नि+पत+"संज्ञायां समजनिषदनिपतेति।" ३। ३। ९९। इति क्यप्। ततष्टाप्।) युद्धभूमिः। इति मुग्धबोधटीकायां दुर्गादासः ॥ (पिच्छिला भूमिः। इति सिद्धान्तकौमुदी ॥)

निपाकः, पुं, (नियमेन पचनमिति। नि+पच+घञ्।) पाकः। इति शब्दरत्नावली ॥

निपाठः, पुं, (नि+पठ+पक्षे घञ्।) पठनम्। इत्यमरः। ३। २। २९ ॥

निपातः, पुं, (नितरां पतनमिति। नि+पत+घञ्।) मृत्युः। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ५। १२२। ९।
"अङ्गेषु निपातेषु तथापद्व्यसनेषु च ॥")
पतनम्। यथा, आनन्दलहर्य्याम्। ५७।
"वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥"

निपातनं, क्ली, (निपात्यतेऽनेनेति। नि+पत+णिच्+करणे ल्युट्।) खलीकारः। इति भरतः॥ अधोनयनम्। इति सर्व्वस्वम्। तत्पर्य्यायः। अवनायः २। इत्यमरः। ३। २। २९ ॥ निपातनम् ३। इति नयनानन्दः ॥ व्याकरणलक्षणानुत्पन्नपदसाधनम्। यथा, निपातनादिष्टसिद्धिः। यल्लक्षणेनानुत्पन्नं तत् सर्व्वं निपातनात् सिद्धमिति भाष्यम् ॥ निपातलक्षणं यथा,
"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम् ॥
इति प्राञ्चः।" इति दुर्गादासः ॥ तद्यथा,—
"वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्य्ययः।